| अथोपपातकानि । | प्रायश्चित्तानि । | तदशक्तौ धेनुदानम् । | तदशक्तौ चूर्णीदानम् । | दक्षिणा । |
|---|---|---|---|---|
| | उपपातकेन ब्राह्मणस्य विरुद्धाभिधाने प्राजापत्यम् ।<br>जातिभ्रंशकरपातकोपपातकादन्यत्राक्रोशस्य लघुगुरुभावं प्रतिसन्धाय एकरात्रत्रिरात्रषड्रात्रोपवासाः ।<br>प्रतिश्रुत्यादानादौ अल्पत्वबहुत्वाभ्याम् एकरात्रत्रिरात्रषड्रात्रोपवासाः ।<br>देवर्षिगोब्राह्मणाचार्य्यमातृपितृनरेन्द्राणां प्रति ष्ठीवनाक्रोशे उल्मुकेन जिह्वादाहो हिरण्यदानञ्च । गुरुब्राह्मणभिन्ने प्रत्याक्रोशने प्रतिताड़ने च दोषाभावः । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| मिथ्याब्राह्मणशपथः । यावज्जीवसुकृतशपथश्च । | विप्रस्य वधसंयुक्तमिथ्याशपथे चान्द्रायणम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| | यावज्जीवसुकृतशपथे प्राजापत्यम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| अभिशापकरणम् । | मासमब्भक्षणम् ।<br>गायत्र्या वशिष्ठोक्तशुद्धवतीनां वा शतजपश्च ।<br>एतत् सकृन्महापातकाद्यभिशापे ।<br>उपपातके त्वभ्यासतो ज्ञेयम् ।<br>न्यूनमहापातकाभिशापाभ्यासे त्वावृत्तितारतम्यात् प्रायश्चित्ततारतम्यं कल्प्यम् ।<br>महापातकादन्यत्र एकविंशतिरात्रं सुवर्च्चलापानम् ।<br>हीनवर्णेन उत्तमवर्णाभिशापे प्रतिलोमोक्तदण्डव्यवस्थया प्रायश्चित्तं कल्प्यम् । | १३ धेनवः । | ३९ कार्षापणाः । | यथाशक्ति । |
| अनृताभिशस्तता । | मासं कृच्छ्रम् । | सार्द्धधेनुद्वयासम्भवात् ३ धेनवः । | ७॥० कार्षापणाः । | यथाशक्ति । |
| | महापातकाभिशापे द्विमासं कृच्छ्रम् ।<br>एतदभिशापकालातिक्रमे ज्ञेयम् । | ५ धेनवः । | १५ कार्षापणाः । | यथाशक्ति । |
| | अभिशापकालनिर्णयप्रवृत्तस्य उपपातकादिना अभिशस्तस्य कृच्छ्रम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| आरूढ़पतितत्वम् । व्याधिक्रोधादिना सन्न्यासवाक्यमुच्चार्य्य यो गृहस्थाश्रममाश्रयितुमिच्छति स आरूढ़पतितः तस्य भावः । | षण्मासान् प्राजापत्यम् ।<br>एतत् सन्न्यासग्रहणान्तरनिवृत्तानाम् ।<br>चिरतरकालसन्न्यासनिवृत्तस्य ब्राह्मणस्य श्वपदाङ्कनपूर्व्वकनिर्व्वासनम् । क्षत्रियविशोर्दास्यकरणम् । | १५ धेनवः । | ४५ कार्षापणाः । | यथाशक्ति । |
| | यावज्जीवव्रतानुष्ठानप्रवृत्तयोः ब्रह्मचारिवानप्रस्थयोः स्वधर्म्मनिवृत्तयोश्चान्द्रायणम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| जलाग्न्यादिभ्रष्टता । आदिना उद्बन्धनप्रव्रज्यानशनविषप्रपतनप्रायोपवेशशस्त्रघातेभ्यो भ्रंशनम् । | चान्द्रायणं तप्तकृच्छ्रद्वयं वा । अभ्यासे त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च । जातकर्म्मादिसंस्काराश्च । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| | चिताभ्रष्टायाः प्राजापत्यम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| श्वक्रव्यादपपत्तिः | त्रिसन्ध्यं गोमयगोमूत्राभ्यां स्नानम् । त्र्यहं पञ्चगव्यकुशोदकमाचमनञ्च । इदञ्च नाभ्यधोदेशदंशविषयम् । | | | |
| | नाभेरूर्द्ध्वं क्रव्युत्पत्तौ षड्रात्रमुपवासः । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |